**मुख्यवार्ताः**

- राष्ट्रपतिपदासीना द्रौपदी मुर्मुः अद्य प्रभृति त्रयाणां देशानां अल्जीरिया-मॉरिटानिया-मलावी-इत्येतेषां यात्रायां याति।
- प्रधानमन्त्री नरेन्द्रमोदी प्रधानमन्त्री गतिशक्तिराष्ट्रीयपरियोजनायाः वर्षत्रयाणां सम्पूर्तेः प्रशंसाम् अकरोत् । उक्तं च यत् एषा परियोजना भारतस्य आधारभूतसंरचनायां परिवर्तनं करोति, सममेव संपर्कं च वर्धयति, येन विकसितभारतस्य परिकल्पनां साकारो भविष्यति।
- पोलैंड देशीयः प्रधानमन्त्री डोनाल्ड टस्कः देशे अवैधप्रवासस्य निवारणाय केषाञ्चन् शरणाधिकाराणां अस्थायीनिलम्बनस्य घोषणां विहितवान्।
- कजाकिस्तान-देशस्य आस्ताना-नगरे प्रचल्यमाणायां एशियाई टेबल टेनिस इति प्रतियोगितायां देशस्य कृते प्रथमं कांस्यपदकं भारतस्य अयिका मुखर्जी-सुतीर्था मुखर्जी इत्यनयोः शीर्ष-महिला-युगलेन विजितम्।
- शारजाह-नगरे प्रचाल्यमाणायाः महिला-विंशतिः प्रति विंशतिः क्रिकेट्क्रीडायाः उपान्यचक्रे भारत - आस्ट्रेलिया-देशयोः मध्ये अद्य सायं स्पर्धा भविष्यति।

**राष्ट्रपतिः-यात्रा**

राष्ट्रपतिपदासीना द्रौपदी मुर्मुः अद्य प्रभृति त्रयाणां देशानां अल्जीरिया-मॉरिटानिया-मलावी-इत्येतेषां यात्रायाम् अस्ति। निज-यात्राप्रवासे राष्ट्रपतिः द्विपक्षीयोपवेशनानि विधास्यति। अपि च भारतीय-प्रवासिभिस्साकं सम्वादं समाचरिष्यति। इयं भारतस्य राष्ट्रपतेः त्रयाणां अफ्रीकीय-देशानां प्रथमायात्रा भवेत् इति। यात्रायाः प्रथमे चरणे राष्ट्रपतिः अल्जीरियां प्रति यास्यति। तदनु राष्ट्रपतिः द्रौपदीमुर्मुः पीपल्स-डेमोक्रेटिक-रिपब्लिक-ऑफ-अल्जीरिया इत्येतस्य अध्यक्षेण अब्देलमजीद-तेब्बौने इत्यमुना साकं द्विपक्षीयोपवेशनं करिष्यति। तदनन्तरं राष्ट्रपतिः भारत-अल्जीरिया-आर्थिक-मञ्चं सिदी-अबदेल्ला-विज्ञान-प्रौद्योगिकीय-विश्वविद्यालयं च सम्बोधयिष्यति। यात्रायाः अन्तिम-चरणे राष्ट्रपतिः मुर्मुः अक्टूबरमासस्य सप्तदशदिनाङ्कतः नवदशदिनांकपर्यन्तं मलावीदेशं प्रति यास्यति।

**प्रधानमन्त्री-गतिशक्तिः**

प्रधानमन्त्री नरेन्द्रमोदी प्रधानमन्त्री गतिशक्तिराष्ट्रीयपरियोजनायाः वर्षत्रयाणां सम्पूर्तेः प्रशंसाम् अकरोत् । सः अवदत् यत् एषा परियोजना भारतस्य आधारभूतसंरचनायां परिवर्तनं करोति, सममेव संपर्कं च वर्धयति, येन विकसितभारतस्य परिकल्पनां साकारो भविष्यति। एकस्मिन् सामाजिकान्तर्जालीय संदेश माध्यमेन श्रीमोदी प्रोक्तवान यत् देशे विकासस्य गतिशक्तिः बहुविधसंपर्कं च वर्धितमस्ति तथा च विभिन्नक्षेत्राणां द्रुततरं विकासं सुनिश्चितम् अस्ति । सः अवदत् यत् विभिन्नानां हितधारकाणां एकीकरणेन सम्भारतंत्र व्यवस्था सुदृढा अभवत्, विलम्बेन कार्याचरणे न्यूनतागता, नैकेषां जनानां कृते नवीनाः जीविकावसराः सृज्यन्ते।

**ओम्-बिरला-अध्यक्षः**

लोकसभाध्यक्षः ओमबिरलाः अद्यारभ्य अस्य मासस्य सप्तदशदिनाङ्कं यावत् जिनेवानगरे आयोक्ष्यमाणायां अन्तासंसदीय-सङ्घस्य आई.पी.यू इत्याख्यस्य नवचत्वारिंशदुत्तरैकशततमायां सभायां संसदीय-प्रतिनिधिमण्डलस्य नेतृत्वं समाचरिष्यति। श्रीबिरलाः **इतोऽपि अधिकं शान्तिपूर्ण-सतत्-भविष्याय विज्ञान-प्रौद्योगिकी-नवाचाराणाम् उपयोगः** इत्यस्मिन् विषये सभां सम्बोधयिष्यति। तदनु असौ अस्य मासस्य चतुर्दश-दिनाङ्के जिनेवानगरे भारतीयप्रवासिभिः समं वार्तां करिष्यति। अपरत्र असौ सभामध्ये अन्येषां संसदां स्वीयै समकक्षैः सहापि संवादं करिष्यति। अवधेयं वर्तते यत् भारतीयप्रतिनिधिमण्डले एतस्मिन् राज्यसभायाः उपराष्ट्रपतिः हरिवंशसिंहः उभयोः सदनयोः महासचिवः अन्ये च संसत्सदस्याः सम्मिलिताः सन्ति।

**प्रधानमन्त्री-इन्टर्नशिप-योजनाः**

चतुर्विंशत्यधिक द्विसहस्रतम वर्षस्य प्रधानमन्त्री इन्टर्नशिप इति व्यवसायिक-प्रशिक्षण-योजनायाः पञ्जीकरणप्रक्रिया अद्य सायं पञ्च वादनात् **pminternship.mca.gov.in** इत्यत्र आरभ्यते। अस्मिन् वर्षे आय-व्यय संकल्पना-पत्रस्य प्रस्तुतेः पूर्वं घोषिता उपक्रमेण यूनां वास्तविकजीवने व्यापारवातावरणेषु हस्तगत-अनुभवं प्राप्तुं सहयोगाय द्वादश मासस्य प्रशिक्षणं प्रदास्यति ।

**पोलैंड**

पोलैंड देशीयः प्रधानमन्त्री डोनाल्ड टस्कः देशे अवैधप्रवासस्य निवारणाय केषाञ्चन् शरणाधिकाराणां अस्थायीनिलम्बनस्य घोषणां विहितवान्। ह्यः वारसा नगरे सिविक प्लेटफार्म पार्टीति सम्मेलने प्रधानमन्त्री टस्कः यूरोपीयदेशैः एतस्य निर्णयस्य स्वीकरणस्य आवश्यकतायाः उपरि सबलं प्रतिपादितवान्। सः अवदत् यत् शत्रुदेशः मानवव्यापारिणः च तस्य दुरुपयोगं कुर्वन्ति। प्रधानमन्त्री श्रीटस्कः अवदत् यत् देशे आगतानां जनानां विषये सर्वकारस्य नियन्त्रणं भवेत्। सः आश्वासनं दत्तवान् यत् सर्वकारः अवैधप्रवासस्य निवारणं करिष्यति।

**दुर्गाविसर्जन :**

भारतस्य महत्त्वपूर्ण-धार्मिकपर्वेसु अन्यतमा दुर्गापूजा अद्य दुर्गादेव्याः मूर्तिनां जलश्रोतेषु विसर्जनेन सह संपन्नतां प्राप्नोति। विविधमन्दिरेभ्यः, परिसरेभ्यः च मूर्तयः विसर्जनार्थं अलङ्कृतेषु ट्रकयानवाहनेषु शोभायात्रायाः माध्यमेन गच्छन्ति।

**महा-शरद पवार :**

राष्ट्रवादीकांग्रेसदलप्रमुखः शरदपवारः अद्य उक्तवान् यत् महाराष्ट्रस्य जनाः राजनैतिकपरिवर्तनार्थं उत्सुकाः सन्ति तथा च आगामिराज्यविधानसभानिर्वाचनस्य परिणामे एषा भावना प्रतिबिम्बिता भविष्यति इति विश्वासमपि प्रकटितवान्। सः मुम्बईनगरे महाविकासअघाडीसंयुते: संयुक्तवार्ताहरसम्मेलने अमुं भावं अवदत्। श्रीपवारः अवदत् यत् राज्य प्रशासनं देशस्य सर्वोत्तमम् प्रशासनम् आसीत् महायुतिशासने अस्य मनोबलं क्षीणं जातम्। महाविकास- अघाडीसंयुत्या विधिव्यवस्थायाः स्थितिः, महिलासुरक्षा, भ्रष्टाचारः, मादकद्रव्याणां समाह्वानं, कृषकाणां आत्महत्या, महाराष्ट्रात् उद्योगस्य स्थानान्तरणं च इत्यादिषु विविधविषयेषु सत्तारूढ महायुतिसर्वकारः प्रहारः कृतः।

**अन्ताराष्ट्रीयापत्शमनदिवसः**

अद्य अन्ताराष्ट्रीयापत्शमनदिवसो वर्तते। आपत्निवारणे शिक्षायाः महत्त्वं प्रकाशयितुं अयं दिवसः आचर्यते। अस्मिन् अवसरे संयुक्तराष्ट्रसङ्घस्य महासचिवः एण्टोनियो गुटेरेस् इत्येष: ऋतु दशाजन्य-आपदाभ्यः बालान् संरक्षयितुं अन्ताराष्ट्रीयपरिकल्पनानां आह्वानं कृतवान्। सः अवदत् यत् समाजं अर्थव्यवस्थां च विहाय आपदाः विशेषतया बालकानां उपरि विनाशकारकप्रभावं जनयति येन तेषां शिक्षा, स्वास्थ्यं, सुरक्षा च प्रभाविता: भवंति। गुटेरेस् इत्यनेन एतादृशानां विद्यालयानां निर्माणं कर्तुं जनेभ्यः आह्वानं विहितम् येन बालाः आपदाभ्यः सुरक्षिताः भवितुं शक्नुवन्ति।

**टेबल टेनिस**

कजाकिस्तान-देशस्य आस्ताना-नगरे प्रचल्यमाणायां चतुर्विंशत्यधिकद्विसहस्रतमवर्षस्य एशियाई टेबल टेनिस इति प्रतियोगितायां देशस्य कृते प्रथमं पदकं भारतस्य अयिका मुखर्जी-सुतीर्था मुखर्जी इत्यनयो: शीर्ष-महिला-युगलेन ऐतिह्यं विनिर्मितमस्ति। अस्यां स्पर्धायां भारतीयमहिलायुगलं कांस्यपदकं लब्धम्।

**महिला क्रिकेट्-**

शारजाह-नगरे प्रचाल्यमाणाया: महिला-विंशतिः प्रति विंशतिः क्रिकेट्क्रीडायाः उपान्यचक्रे भारत - आस्ट्रेलिया-देशयोः मध्ये स्पर्धा भविष्यति। भारतीय समयानुसारं इयं स्पर्धा सार्ध सप्तवादने भविष्यति।

**।।इति वार्ता:।।**